K16U 0599

GOVT. BRENNEN COLLEGE
CENTRAL LIBRARY
THALASSERY

Reg. No. : ....................................

Name : ........................................

# IV Semester B.A. Degree (CBCSS – 2014 Admn. – Regular) Examination, May 2016
## CORE COURSE IN SANSKRIT
## 4B06 SKT : Gadyasahityam

Time : 3 Hours Max. Marks : 40

*सूचना : 1) सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः ।*
*2) देवनागरीलिपिरुपयोक्तव्या ।*

I. वाक्येन वाक्याभ्यां वा **दशानां** उत्तरं लिखत । (1×10=10)

1) वेत्रवती सरित् कीदृशी ?

2) वैशम्पायनः कः ?

3) बाणविरचिता आख्यायिका का ? तस्मिन् कस्य चरितं वर्ण्यते ?

4) गद्यकाव्यं लक्षयत ।

5) कुमारपालितः कः ?

6) शुकानां अस्फुटालापता कथं समजनि ?

7) पम्पासरः कस्य आश्रमात् नाति दूरे वर्तते ?

8) शाल्मली वृक्षः कुत्रासीत् ?

9) मातङ्गकः कः आसीत् ?

10) वैशम्पायनस्य माता कथं लोकान्तरगता ?

11) आचार्य दण्डिना विरचितः कथाग्रन्थौ कौ ?

12) राजा तु तां श्रुत्वा संजातविस्मयः – कां श्रुत्वा ?

II. द्वे व्याख्यात । (3×2=6)

13) अहो विधातुरस्थाने सौन्दर्यनिष्पादनप्रयत्नः । तथा हि यदि नामेयमात्मरूपोपहसिताशेषरूपसंपदुत्पादिता, किमर्थं अपगतस्पर्शसम्भोगसुखे कृतं कुले जन्म । मन्ये च मातङ्गजातिस्पर्शदोषभयादस्पृश्यतेयमुत्पादिता प्रजापतिना, अन्यथा कथमियमक्लिष्टता लावण्यस्य ।

P.T.O.

14) श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता । प्रथमं तावदिदमेव महदाश्चर्यम्, यदयमसंकीर्ण वर्ण विभागामभिव्यक्तमात्रानुस्वार संस्कारयोगां विशेष संयुक्तां गिरमुदीरयति । तत्र पुनरपरमभिमतविषये तिरश्चोऽपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः ।

15) अचिराच्च प्रशान्ते तस्मिन्मृगयाकलकले निर्वष्टमूक जलधरवृन्दानुकारिणि मथनावसानोपशान्त वारिणि सागर इव स्तिमिततामुपगते कानने मन्दीभूतभयोऽहमुपजात कुतूहलैः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य संत्रासतरलतारकः शैशवात्किमिदमित्युपजातदिहक्षस्तामेव दिशः चक्षुः प्राहिणवम् ।

16) असावपि पापः शाखान्तरैः सञ्चरमाणः कोटरद्वारमागत्य जीर्णासितभुजगभोगभीषणं प्रसार्य विविध वनवराह वसविस्रगन्धि करतलं कोदण्डगुणाकर्षणव्रणाङ्कित प्रकोष्ठमन्तकदण्डानुकारिणं वामबाहुमतिनृशंसो मुहुर्मुहुर्दत्तचञ्चुप्रहारमुत्कूजन्तमाकृष्य तातं गतासुमकरोत् ।

III. **चतुर्णां** लघूपन्यासं लिखत : **(3×4=12)**

17) सभामण्डपं वर्णयत ।

18) चण्डालकन्यकां उपवर्णयत ।

19) अगस्त्याश्रमवर्णना ।

20) विन्ध्याटवी वर्णना ।

21) वैशम्पायनस्य जन्म ।

22) जाबालिः ।

IV. द्वे उपन्यास्यत । **(6×2=12)**

23) 'गद्यं कवीनां निकषं वदन्ति' इत्युक्तिं कादम्बरीं आधारीकृत्य समर्थयत ।

**अथवा**

पाठ्यभागानुसारं बाणस्य गद्यशैलिं विमृशत ।

24) शुककथां संक्षिप्य लिखत ।

**अथवा**

यथाग्रन्थं शूद्रकमुपवर्णयत ।

———————